उणां । ४।५६ । इति क्विन् प्रत्ययेन निपातनात् साधुः ।) शोभा । दीप्तिः । इत्यमरः । १।३।१७॥ (यथा, मेघदूते । ३५ ।
"भर्त्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः॥")

छष, ञ वधे । इति कविकल्पद्रुमः । ( भ्वां-उभं-सकं-सेट् । ) ञ, छषति छषते । अयं केश्चिन्न मन्यते । इति दुर्गादासः ।

छा, स्त्री, ( छद् + डः टाप् च ।) आच्छादनम् । इति मेदिनी । छे, १ ॥

छाः,पुं,(छादयते मात्रपत्राभ्यामसौ । छद् + "सर्व्वधातुभ्योऽसुन् ।"उणां ।४।१८८। इति असुन् ततः पृषोदरात् साधुः ।) पावकः । इत्येकाचरकोषः ॥

छागः, पुं,स्त्री, ( छायते छिद्यते देवबलये इति । छो + "छापूखडिभ्यः कित् ।" उणां । १।१२४। इति गन् । ) पशुविशेषः । तत्पर्य्यायः । वस्तः २ छगलकः ३ अजः ४ स्तुभः ५ । इत्यमरः । २ । ९ । ७६ ॥ छगः ६ छगलः ७ छागलः ८ तभः ९ स्तभः १० शुभः ११ । इति तट्टीका ॥ लघुकामः १२ क्रयसदः १३ वर्करः १४ पर्णभोजनः १५ लम्बकर्णः १६ मेनादः १७ वुक्कः १८ अल्पायुः १९ शिवाप्रियः २० । इति शब्दरत्नावली ॥ अवुकः २१ मेध्यः २२ पशुः २३ पयस्वलः २४ । तन्मांसगुणाः । लघुत्वम् । स्निग्धत्वम् । नातिशीतत्वम् । रुचिबलपुष्टिदातृत्वम् । निर्द्दोषत्वम् । वातपित्तनाशित्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः॥ शुक्रधातुसाम्यकारित्वम् । वृंहणत्वम् । स्निग्धत्वम् । मृदुत्वम् । अनभिष्यन्दित्वम् । नातुष्णत्वञ्च । इति राजवल्लभः ॥*॥ छागपोतमांसगुणाः । लघुत्वम् । शीतत्वम् । प्रमेहनाशित्वञ्च ॥ स्तनचारिछागस्य मांसगुणः । ईषल्लघुत्वम् । बलदातृत्वञ्च॥ तन्मूत्रगुणाः । कटुत्वम् । उष्णत्वम् । रूक्षत्वम् । नाडीविषार्शःप्लीहोदरकफश्वासगुल्मशोफनाशित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः॥

"छागलो वर्करश्छागो वस्तोऽजश्छेलकः शुभः ।
छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् ॥
नातिशीतमदाहि स्यात् स्वादु पीनसनाशनम् ।
परं बलकरं रुच्यं वृंहणं बलवर्द्धनम् ॥
अजाया अप्रसूताया मांसं पीनसनाशनम् ।
शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् ॥
अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् ।
हृद्यं ज्वरहरं श्रेष्ठं सुस्वादु बलदं भृशम् ॥
मांसं निष्कासिताण्डस्य छागस्य कफकृद्गुरु ।
स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् ॥
वृद्धस्य वातलं रूक्षं तथा व्याधिमतस्य च ।
ऊर्द्ध्वजत्रुविकारघ्नं छागमुण्डं रुचिप्रदम् ॥"
इति भावप्रकाशः ॥

(एतन्मांसं पितॄणां तृप्तिकरत्वात् श्राद्धाय देयम् । यथाह याज्ञवल्क्यः । १ । २५८ ।
"मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥"
छागमांसेन पितॄणां षण्मासान् यावत्तृप्तिः । यथाह मनुः । ३ । २६९ ।
"षण्मासान् छागमांसेन पार्षतेन च सप्त वै ॥"
भोजराजेन युक्तिकल्पतरौ एतत्परीक्षोक्ता । यथा,—
"नक्षत्राणां विभेदेन नराणान्तु गणत्रयम् ।
तेषां शुभाय निर्दिष्टं पशुवस्तत्रयं बलौ ।
ये कृष्णाः शुचयश्छागाः पशवोऽन्ये तथैव च ।
देवजातिभिरतृष्ण्यास्ते सर्व्वार्थोपसिद्धये ॥
ये पीता हरिता वापि नरजातिरुदीरिताः ।
ये शुक्लाश्च महान्तो वा रक्षोजातेः शुभप्रदाः ॥
यो मोहादथवाज्ञानाद्वलिमन्यं प्रयच्छति ।
वध एव फलं तस्य नान्यत् किञ्चित् फलं भवेत् ॥"
एतस्य पशोर्लक्षणादिकं विशेषतो वृहत्संहितायाम् ६५ अध्याये उक्तम् । यथा,—
"छागशुभाशुभलक्षण-
मभिधास्ये नवदशाष्टदन्तास्ते ।
धन्याः स्थाप्या वेश्मनि
सन्त्याज्याः सप्तदन्ता ये ॥
दक्षिणपार्श्वे मण्डल-
मसितं शुक्लस्य शुभफलं भवति ।
ऋष्यनिभकृष्णलोहित-
वर्णानां श्वेतमपि शुभदम् ॥
स्तनवदवलम्बते यः
कण्ठेऽजानां मणिः स विज्ञेयः ।
एकमणिः शुभफलकृ-
द्धन्यतमा द्विमणयो ये ॥
मुण्डाः सर्व्वे शुभदाः
सर्व्वसिताः सर्व्वकृष्णदेहाश्च ।
अर्द्धासिताः सितार्द्धा
धन्याः कपिलार्द्धकृष्णाश्च ॥
विचरति यूथस्याग्रे
प्रथमं चाम्भोऽवगाहते योऽजः ।
स शुभः सितमूर्द्धा वा
मूर्द्धनि वा टिक्किका यस्य ॥
सपृषतकण्ठशिरा वा
तिलपिष्टनिभश्च ताम्रदृक् शस्तः ।
कृष्णचरणः सितो वा
कृष्णो वा श्वेतचरणो यः ॥
यः कृष्णाण्डः श्वेतो
मध्ये कृष्णेन भवति पट्टेन ।
यो वा चरति सशब्दं
मन्दञ्च स शोभनश्छागः ॥
ऋष्यशिरोरुहपादो
यो वा प्राक् पाण्डुरोऽपरे नीलः ।
स भवति शुभकृच्छागः
श्लोकश्चाप्यत्र गर्गोक्तः ॥
कुट्टकः कुटिलश्चैव जटिलो वामनस्तथा ।
ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति ते ॥
अथाप्रशस्ताः खरतुल्यनादाः
प्रदीप्तपुच्छाः कुनखा विवर्णाः ।
निकृत्तकर्णा द्विपमस्तकाश्च
भवन्ति ये चासिततालुजिह्वाः ॥
वर्णैः प्रशस्तैर्मणिभिश्च युक्ता
मुण्डाश्च ये ताम्रविलोचनाश्च ।
ते पूजिता वेश्मसु मानवानां
सौख्यानि कुर्व्वन्ति यशः श्रियञ्च ॥")

छागणः, पुं, (छगण एव । स्वार्थे अण् ।) करीषाग्निः । इति त्रिकाण्डशेषः ॥ घुँटेर आगुन इति भाषा ॥

छागभोजी, [न्] पुं, स्त्री, ( छागं भुङ्क्ते भक्षयतीति । भुज् + णिनिः । ) वृकः । इति राजनिर्घण्टः ॥ छागभक्षके, त्रि ॥

छागरथः, पुं, (छागः रथो वाहनमस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६३ ॥

छागलः, पुं,स्त्री, ( छगल एव इति प्रज्ञाद्यण् ।) छागः । इति राजनिर्घण्टः ॥ ( यथा, पञ्चतन्त्रे । ३ । ११७ ।
"बहुबुद्धिसमायुक्ताः सुविज्ञाना बलोत्कटान् ।
शक्ता वञ्चयितुं धूर्त्ता ब्राह्मणं छागलादिव ॥"
छगलस्य गोत्रापत्यं पुमान् इति । छगल + "विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु ।" ४ । १ । ११७ । इति अण् । आत्रेय ऋषिभेदः । इति सिद्धान्तकौमुदी ॥ )

छागलकः, पुं, (छागल इव कायतीति । कै + कः ।) मत्स्यविशेषः । यथा,—
"श्वेतं सुपाकं समदीर्घवृत्तं
निःशल्कलं छागलकं वदन्ति ।
गले द्विकण्टः किल तस्य पृष्ठे
कण्टः सुपथ्यो रुचिदो बलप्रदः ॥"
इति राजनिर्घण्टः ॥
( स्वार्थे कन् । ) छागलञ्च ॥

छागलाद्यं, क्ली, ( छागल आद्यः प्रधानो यत्र ।) छागलादिघृतम् । तच्च वातरोगस्यौषधम् । यथा,
"च्छागं चर्म्मविनिर्मुक्तं त्यक्तशृङ्गखुरादिकम् ।
पञ्चमूलीद्वयञ्चैव जलद्रोणे विपाचयेत् ॥
तेन पादावशेषेण घृतप्रस्थं विपाचयेत् ।
जीवनीयैः सयष्ट्याह्वैः चीरञ्चैव शतावरी ॥
छागलाद्यमिदं नाम्ना सर्व्ववातविकारनुत् ।
अर्दिते कर्णशूले च बाधिर्य्ये मूकमिन्मिने ॥
जड़गद्गदपङ्गूनां खञ्जे गृध्रसिकुब्जयोः ।
अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते ॥
पृथगर्द्धतुलां पञ्चमूलद्वन्द्वाजमांसयोः ।
निःक्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते ॥"
इति स्वल्पच्छागलाद्यं घृतम् ॥ * ॥

घृतारम्भे मन्त्रः ।
"ओँ कालि वज्रेश्वरि अमुकस्य फलसिद्धं देहि रुद्रवचनेन स्वाहा ।
स्नापयित्वा छागमादौ मधु दत्त्वा ललाटके ।
उदङ्मुखः प्राङ्मुखो वा भिषग्गेनमुपालभेत् ॥
छागमारणमन्त्रः ।
ओँ ह्रीँ ओँ गँ गणपतये स्वाहा ।
छागमांसतुलां गृह्य दशमूल्याः पलं शतम् ।
अश्वगन्धापलशतं वाट्यालकशतं तथा ॥
घृताढ़कं पचेत्तोयेश्चतुर्भागावशेषितैः ।